मशौचम् । “अथ ब्राह्मणादीनामशौचे यः सकृदेवान्नमश्नाति तस्य तावदशौचम् यावत्तेषाम्” विष्णुः एतत् ज्ञानतः, अज्ञाने तु “अन्तर्दशाहे भुक्तान्नं मृतके सूतकेऽपि वा तस्याशौचं भवेत्तावद्यावदन्नं व्रजत्यधः” अङ्गिरसोक्तं ज्ञेयम् “उभयत्र दशाहानि कुलस्यान्नं न भुज्यत” इति यमः । उभयत्र जननमरणयोः दशाहानीत्यशौचकालोपलक्षणम् । कुलस्य सूतकयुक्तस्य सम्बन्ध्यन्नमसकुल्यैर्न भोक्तव्यम् । सकुल्यानां न पुनर्दोषः “सूतके तु कुलस्यान्नमदोषं मनुरब्रवीत्” इति तेनैवोक्तत्वात् अयञ्च निषेधोदातृभोक्त्रोरन्यतरेण जननमरणे ज्ञाते सति द्रष्टव्यः ।“उभाभ्यामपरिज्ञाते सूतकं नैव दोषकृत् । एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेदिति षड्त्रिंशन्मतदर्शनात् । तथाविवाहादिषु सूतकोत्पत्तेः प्राक् ब्राह्मणार्थं पृथक्कृतमन्नं भोक्तव्यमेव । “विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके । पूर्वसङ्कल्पितार्थेषु न दोषः परिकीर्त्तित” इति वृहस्पतिस्मरणात् तथाऽपरोऽपि विशेषः षड्विंशन्मते दर्शितः । “विवाहोत्सवयज्ञेषु त्वन्तरामृतसूतके । परैरन्नं प्रदातव्यम्भोक्तव्यञ्च द्विजोत्तमैः । भुञ्जानेषु तु विप्रेषु त्वन्तरा मृतसूतके । अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः”नि०सि० इति।तथाऽशौचिपरिग्रहत्वेऽपि केषु चित्द्रव्येषु दोषाभावः । यथाह मरीचिः । “लवणे मधुमांसे च पुष्पमूलफलेषु च । शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च । तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः । पण्येषु चैव सर्वेषु नाशौचं मृतसूतके” इति । शाकम्भक्ष्य जातम् । अपक्वन्तण्डुलादि। स्वयंग्रह इति स्वयमेव स्वाम्यनुज्ञातो गृह्णीयात् न तद्धस्तात् । एतदप्यामान्नविषयं सत्रप्रवृत्तविषयञ्च । “अन्नसत्रप्रवृत्तानामाममन्नमगर्हितम् । भुक्त्वा पक्वान्नमेतेषांत्रिरात्रन्तु पयः पिबेदिति”अङ्गिरः स्मरणात्। अत्र पक्वशब्दोऽभक्ष्यव्यतिरिक्तौदनादिविषयः। शवसंसर्गनिमित्ताशौचे त्वङ्गिरसा विशेषउक्तः । “अशौचं यस्य संसर्गादापतेद्गृहमेधिनः । क्रियास्तस्यैव लुप्यन्ते गृह्याणाञ्च न तद्भवेदिति” । तदशौचङ्केवलं गृहमेधिन एव न पुनस्तद्गृहस्थानां भार्यादीनान्तद्द्रव्याणाञ्च भवेदित्यर्थः । एवमेवातिक्रान्ताशौचेऽपि । “संसर्गाद्यस्य चाशौचं यस्यातिक्रान्तकालता । तदीयस्य पदार्थस्य नाशौचं विद्यते क्वचित्” षट्त्रि० नि०सि० । कर्म्मविशेषे कर्म्मारम्भे च तत्तत्कर्म्मणि अशौचाभावः यथोक्तम् । “कारवः शिल्पिनो वैद्या दासीदासास्तथैव च । राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः”प्रचेतसा,। लघुविष्णुना च“व्रतयज्ञविवाहेषु श्राद्धे होमार्च्चने जपे । आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् । प्रारम्भोवरणं यज्ञे संकल्पो व्रतबन्धयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रिया” वरणमिति ऋत्विक्परम् तेषाञ्च मधुपर्कग्रहणोत्तरमशौचाभावः। “गृहीतमधुमर्कास्तु यजमानात्तु ऋत्विजः। पश्चादशौचं पतितं न भवेदिति निश्चयः” ब्रह्मपुरा० उक्तेः एतन्मूलकमेव त्रिंशच्छ्लोक्यां तत्तत्कार्य्येषु अशौचाभाववचनम् यथा “तत्तत्कार्य्येषु सत्रिव्रतिन्टपनृपवद्दीक्षितर्त्विक्स्वदेशभ्रंशापत्स्वप्यनेकश्रुतिपठनभिषक्कारुशिल्पग्रातुराणाम् । संप्रारब्धेषु दानोपनयनयजनश्राद्धयुद्धप्रतिष्ठाचूड़ातीर्थाङ्गयात्राजपपरिणयनाद्युत्सवेष्वेतदेव” “तीर्थेति आकस्मिकतीर्थप्राप्तौ तदङ्गं श्राद्धमशौचे कर्त्तव्यम् “विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि । न तत्र सूतकं तद्वत् कर्म्म यज्ञादि कारयेत्” पैठी० उक्तेः यात्रा रथयात्रादि । जपः पुरश्चरणादि संकल्पितस्तोत्रपाठादिश्च । व्रती संकल्पेन गृहीतव्रतादिः “गृहीतनियमस्यापि न स्यादन्यस्य कस्यचिदिति” ब्राह्मोक्तेः “वरं प्राणान् परित्यज्य मुण्डनं शिरसोऽपि वा नत्वनभ्यर्च्य भोक्तव्यं भगवन्तं त्रिलोचनम्”इत्युक्तनियमवतो देवपूजायामधिकारः । कृतनियमविषया “शिवविष्ण्वर्च्चनं दीक्षा यस्य चाग्निपरिग्रहः । श्रौतकर्म्माणि कुर्व्वीत स्नातः शुद्धिमवाप्नुयात्”यमोक्तिः“जपो देवार्च्चनविधिः कार्य्योदीक्षान्वितैर्नरैः नास्ति पापं यतस्तेषां सूतकं वा यतात्मनाम्”मुक्तावली च। “अथ सूतकिनः पूजां वक्ष्याम्यागमचोदिताम् । स्नात्वा निर्वर्त्य नित्यञ्च मानस्या क्रियया हि वै । बाह्यपूजाक्रमेणैव ध्यानयोगेन पूजयेत्” शारदा। मानसजपे तु अकृतनियमस्यापि अशुचेरप्यधिकारः “अशुचिर्वा शुचिर्वापि गच्छन् तिष्ठंस्तथा स्वपन् । मन्त्रैकस्मरणोविद्वान् मनसैव समभ्यसेत् “रामार्च्चनचन्द्रिकोक्तेः “मानसमप्यशुचीति” वचनं तु पठनपाठनाविषयम् । तारादिविषये तु अकृतनियमस्याप्यधिकारः “तारायाश्चैव काल्याश्च त्रिपुराया विशेषतः । जनने मरणे चैव न त्यजेयुर्जपार्च्चनम्”इति तन्त्रोक्तेः। अथाशौचे नियमाः नि०सि०याज्ञवल्क्यः “इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः । विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः । आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् । प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः” । “प्रवेशनादिकं